# सुन्दरकाण्ड त्रिषष्टितमः सर्गः (६३) - मधुवनभङ्ग-निवेदनम्

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः ।
दृष्ट्वैवोद् विग्न हृदयो वाक्यमेत दुवाच ह ॥ १ ॥

उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ।
अभयं ते भवेद्वीर सर्व मेवाभि धीयताम् ॥ २ ॥

स तु विश्वासितस् तेन सुग्रीवेण महात्मना ।
उत्थाय सुमहा प्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ३ ॥

नैवर्क्षरजसा राजन् न त्वया नापि वालिना ।
वनं निसृष्ट पूर्वं हि भक्षितं तच्च वानरैः ॥ ४ ॥

एभिः प्रधर्षिताश् चैव वानरा वन रक्षिभिः ।
मधून्य चिन्तयित्वेमान् भक्षयन्ति पिबन्ति च ॥ ५ ॥

शिष्ट मत्राप विध्यन्ति भक्षयन्ति तथाऽपरे ।
निवार्यमाणास् ते सर्वे भ्रुवौ वै दर्शयन्ति हि ॥ ६ ॥

इमे हि संरब्ध तरास् तथा तैः सम्प्रधर्षिताः ।
वारयन्तो वनात् तस्मात् क्रुद्धैर् वानर पुङ्गवैः ॥ ७ ॥

ततस्तैर् बहुभिर् वीरैर् वानरैर् वानरर्षभ ।
संरक्त नयनैः क्रोधाद् धरयः प्रविचालिताः ॥ ८ ॥

पाणिभिर् निहताः केचित् केचिज् जानुभिराहताः ।
प्रकृष्टाश्च यथा कामं देवमार्गं च दर्शिताः ॥ ९ ॥

एवमेते हताः शूरास् त्वयि तिष्ठति भर्तरि ।
कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १० ॥

एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् ।
अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ ११ ॥

किमयं वानरो राजन् वनपः प्रत्युपस्थितः ।
कं चार्थ मभिनिर्दिश्य दुःखितो वाक्य मब्रवीत् ॥ १२ ॥

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ।
लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्य विशारदः ॥ १३ ॥

आर्य लक्ष्मण सम्प्राह वीरो दधिमुखः कपिः ।
अङ्गद प्रमुखैर् वीरैर् भक्षितं मधु वानरैः ॥ १४ ॥

विचित्य दक्षिणामाशा मागतैर् हरिपुङ्गवैः ।
नैषाम कृत कृत्याना मीदृशः स्यादुपक्रमः ॥ १५ ॥

आगतैश्च प्रमथितं यथा मधुवनं हि तैः ।
धर्षितं च वनं कृत्स्न मुपयुक्तं च वानरैः ॥ १६ ॥

वनं यदाऽभिपन्नमंतै साधितं कर्म वानरैः ।
दृष्टा देवी न सन्देहो न चान्येन हनूमता ॥ १७ ॥

न ह्यन्यः साधने हेतुः कर्मणोऽस्य हनूमतः ।
कार्यसिद्धिर् मतिश्चैव तस्मिन् वानर पुङ्गवे ॥ १८ ॥

व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् ।
जाम्बवान् यत्र नेता स्या दङ्गदश्च महाबलः ॥ १९ ॥

हनूमांश् चाप्यधिष्ठाता न तस्य गतिरन्यथा ।
अङ्गद प्रमुखैर् वीरैर् हतं मधुवनं किल ॥ २० ॥

वारयन्तश्च सहितास् तथा जानुभिराहताः ।
एतदर्थ मयं प्राप्तो वक्तुं मधुर वागिह ॥ २१ ॥

नाम्ना दधिमुखो नाम हरिः प्रख्यात विक्रमः ।
दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ॥ २२ ॥

अभिगम्य तथा सर्वे पिबन्ति मधु वानराः ।
न चाप्य दृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ ॥ २३ ॥

वनं दत्तवरं दिव्यं धर्षयेयुर् वनौकसः ।
ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सह राघवः ॥ २४ ॥

श्रुत्वा कर्ण सुखां वाणीं सुग्रीव वदनाच्च्युताम् ।
प्राहृष्यत भृशं रामो लक्ष्मणश्च महाबलः ॥ २५ ॥

श्रुत्वा दधिमुखस् येदं सुग्रीवस्तु प्रहृष्य च ।
वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ २६ ॥

प्रीतोऽस्मि सोहं यद्भुक्तं वनं तैः कृत कर्मभिः ।
मर्षितं मर्षणीयं च चेष्टितं कृत कर्मणाम् ॥ २७ ॥

इच्छामि शीघ्रं हनुमत् प्रधानान्
शाखा मृगांस् तान् मृगराज दर्पान् ।
द्रष्टुं कृतार्थान् सह राघवाभ्यां
श्रोतुं च सीताधिगमे प्रयत्नम् ॥ २८ ॥

प्रीति स्फीताक्षौ सम्प्रहृष्टौ कुमारौ
दृष्ट्वा सिद्धार्थौ वानराणां च राजा ।
अङ्गैः संहृष्टैः कर्म सिद्धिं विदित्वा
बाह्वो रासन्नां सोऽतिमात्रं ननन्द ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥